## केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली

# साकेते संस्कृतच्छात्राः ......

## प्रतिभाशालिनां भारतीयसंस्कृतच्छात्राणामपि भविष्यति रामदर्शनम् .....



एकषष्ठितमी अखिलभारतीयशास्त्रीयस्पर्धा अयोध्यायां भविष्यति इति कुलपतिभिः विगतवर्षे काश्यां (22/03/23 तः 25/03/23 पर्यन्तं प्रवृत्तायां षष्ठितम्याम् अखिलभारतीयशास्त्रीयस्पर्धायाम्) समुद्घोषितमासीत्। तदनु अस्मिन् वर्षे मार्चमासे 18/03/2024 तः 21/03/2024 पर्यन्तम् अयोध्यायाम् अखिलभारतीयशास्त्रीयस्पर्धाः भविष्यन्ति इति कुलपतिभिः पुनरपि शुभसन्दर्भे सानन्दमुद्घोषितम्। राज्यस्तरीयासु विभिन्नासु वाक्प्रतियोगितासु कण्ठपाठप्रतियोगितासु शलाकाप्रतियोगितासु च चिताः विभिन्नराज्यानां

संस्कृतच्छात्राः रामजन्मभूमौ एकत्रिताः सन्तः स्वीयां प्रतिभां प्रदर्शयिष्यन्ति। कुलपतीनां दूरदृष्ट्या भारतीयाः संस्कृतच्छात्राः ज्ञानमनोरञ्जनपुरस्कारपुण्यादिकमवाप्तुं प्रभविष्यन्ति इति नूनं विशेष एव। एवं केन्द्रीयसंस्कृतविश्वविद्यालयेन अयोध्यायां (18/03/2024 तः 21/03/2024 पर्यन्तम्) समायोज्यमाने प्रतिष्ठापनोत्तरकालिके च कार्यक्रमे भारतस्य सर्वकोणेभ्यः समागताः उपसहस्रं छात्राः तेषां गुरवः वरिष्ठाः विद्वांसः निर्णायकाः अभिभावकाश्च भगवतः श्रीरामस्य भव्यमूर्त्तेः दर्शनं मुहुर्मुहुः करिष्यन्ति इति कौतुकवती नववार्ता। कार्यक्रमनिदेशकः प्रो. मधुकेश्वरभट्टवर्यः गते सप्ताहे अयोध्यां गत्वा व्यवस्थादिकं दृष्ट्वा सन्तृप्तः सन् प्रत्यागतः। संस्कृतलोकस्य इतिहासपुटेषु इयमेका विशिष्टघटना नूनमेव उल्लिख्यत इति शिवम्।



**वार्तालेखः - डा. गणेश ति. पण्डितः**

उपनिदेशकः (वि.प्र.)

के.सं.वि. , नवदेहली